✧˖°*❋ ❋*°˖✧

# শনি স্তোত্রং দশরথ কৃতম্

## Shani Stotram : Dasaratha Krutam in bengali

✧˖°*❋ ❋*°˖✧

# ॥ শনি স্তোত্রং দশরথ কৃতম্ ॥

নমঃ কৃষ্ণায নীলায শিখিখংডনিভায চ ।
নমো নীলমধূকায নীলোত্পলনিভায চ ॥ 1 ॥

নমো নির্মাংসদেহায দীর্ঘশ্রুতিজটায চ ।
নমো বিশালনেত্রায শুষ্কোদর ভযানক ॥ 2 ॥

নমঃ পৌরুষগাত্রায স্থূলরোমায তে নমঃ ।
নমো নিত্যং ক্ষুধার্তায নিত্যতৃপ্তায তে নমঃ ॥ 3 ॥

নমো ঘোরায রৌদ্রায ভীষণায করালিনে ।
নমো দীর্ঘায শুষ্কায কালদংষ্ট্র নমোঽস্তু তে ॥ 4 ॥

নমস্তে ঘোররূপায দুর্নিরীক্ষ্যায তে নমঃ ।
নমস্তে সর্বভক্ষায বলীমুখ নমোঽস্তু তে ॥ 5 ॥

সূর্যপুত্র নমস্তেঽস্তু ভাস্বরোভযদাযিনে ।
অধোদৃষ্টে নমস্তেঽস্তু সংবর্তক নমোঽস্তু তে ॥ 6 ॥

নমো মংদগতে তুভ্যং নিষ্প্রভায নমোনমঃ ।
তপসা জ্ঞানদেহায নিত্যযোগরতায চ ॥ 7 ॥

জ্ঞানচক্ষুর্নমস্তেঽস্তু কাশ্যপাত্মজসূনবে ।
তুষ্টো দদাসি রাজ্যং ত্বং ক্রুদ্ধো হরসি তৎ ক্ষণাত্ ॥ 8 ॥

দেবাসুরমনুষ্যাশ্চ সিদ্ধবিদ্যাধরোরগাঃ ।
ত্বযাবলোকিতাস্সৌরে দৈন্যমাশুব্রজংতিতে ॥ 9 ॥

ব্রহ্মা শক্রোযমশ্চৈব মুনযঃ সপ্ততারকাঃ ।
রাজ্যভ্রষ্টাঃ পতংতীহ তব দৃষ্ট্যাঽবলোকিতঃ ॥ 10 ॥

ত্বযাঽবলোকিতাস্তেঽপি নাশং যাংতি সমূলতঃ ।
প্রসাদং কুরু মে সৌরে প্রণত্বাহিত্বমর্থিতঃ ॥ 11 ॥

✧×……°*❋ ❋*°……×✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net